कर्म्म विशेक्ष्यति तेन वाक्यभेदो न भविष्यति। तस्मात् कर्म्मान्तरम् इति सिद्धम्” भाष्यम्।

तत्त्वबोधिन्यां विवृतमेतत् यथा

“उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोति दर्शपौर्णमासाभ्यां मासं यजेतेति” श्रूयते। उपसदश्च ज्योतिष्टोमयागे दीक्षादिवसादूर्द्ध्वं सोमाभिषवदिवसात् पूर्व्वं कर्त्तव्या होमविशेषा इति माधवाचार्य्यप्रभृतियाज्ञिकमीमांसकाः तत्परिपाटी च(डावका) इत्यस्मद्देशप्रसिद्धजलपात्रसदृशाकारकम्बुग्रीवादिवदनेकरेखाविशिष्टाग्रभागमहावीराख्यपात्रविशेषः तत्संस्थानं यथा तस्मिन् पात्रे यवागूसहितं दधि कृत्वा संदंशाकारकाष्ठद्वयेन तस्य ग्रीवां धृत्वा दक्षिणावर्त्तेन परावृत्य एकवारं तत्र स्थितं प्रतप्तं यवागूदधि जुहोति वामावर्त्तेनापरवारमिति वारद्वयहोमेनैकोपसद्भवतीति याज्ञिकप्रसिद्धिः। उपसद्भिरित्यभेदे तृतीयाश्वमेधेनेत्यादिवत् तथाच उपसद्यागाचरणं कृत्वेत्यर्थः एतेन “उपसत्कथ्यते तत्र सतिलैर्व्रीहिभिश्चरुरिति मीमांसानभिज्ञस्य कल्पनं निरस्तं मीमांसासन्निबन्धृा केनापि तथानभिधानात्। अत्र “यावज्जीवमग्निहोत्रं जुहोतीति” श्रुतिप्राप्ताग्निहोत्रमनूद्य उपसदानन्तर्य्यं माससाध्यत्वञ्चेति गुणद्वयं विधीयते किंवा विशिष्टकर्म्मान्तरमिति संशये नायं कर्म्मान्तरविधि गौरवात् किन्तु कॢप्ताग्निहोत्रे गुणद्वयविधिर्लाघवात् नच प्रकरणान्तरपठितत्वेनाग्निहोत्रपदानुकॢप्तस्योपस्थितिरिति वाच्यम् अग्निहोत्रशब्दस्य तत्रैव शक्तेर्नानार्थत्वाभावाच्च प्रकरणान्तरेऽप्युपस्थितिसम्भवात् न च कथं तत्रैवाग्निहोत्रपदशक्तिः कौण्डपायिनामयनेऽपि तच्छक्तिसम्भवादिति वाच्यं “यावज्जीवमग्निहोत्रं जुहोतीति” श्रुत्युक्ताग्निहोत्रस्य “यदग्नये च प्रजापतये च सायं प्रातर्जुहोतीति” श्रुत्या देवताकाङ्क्षानिरासेनाग्निहोत्रपदस्य यागनामपरत्वेन तत्र रूढ़त्वात् इह तु देवताकाङ्क्षानिरासार्थम् अग्नेर्होत्रमिति व्युत्पत्तिकल्पनेनाग्निदेवताकत्वरूपोपाधिहोत्रगुणयोगाद्गौणत्वस्यापि ज्ञापितत्वात् नानाशक्तिकल्पने गौरवादिति प्राप्ते उच्यते प्राप्ते कर्म्मणि गुणद्वयविधाने वाक्यभेदापत्तेः तथाहि किं मास एव विधीयते उत उपसद्भिश्चरित्वेति उपसदपि, नाद्यः नित्याग्निहोत्रे उपसदोऽसत्त्वेन तस्यापि विधातव्यत्वादित्युभयगुणविधौ वाक्यभेदापत्तेः प्रधानानुवादेन गुणद्वयविधाने प्रधानापूर्व्वस्य प्राप्तत्वेन गुणानां फलोपकारकाङ्क्षतया एकगुणविधानेनाकाङ्क्षानिवृत्तौ विधेयान्तरं प्रति आकाङ्क्षामुत्थाप्य वाक्यान्तरकल्पनेनाग्निहोत्रं मासं कुर्य्यात् अग्निहोत्रमुपसदनन्तरं कुर्य्यादिति विधिद्वये पर्य्यवसानात् अपूर्व्वद्वयं विधेयं स्यात् तत्र प्रत्येकगुणानुष्ठाने प्रत्येकमपूर्व्वमित्यपूर्व्वद्वयं मिलितानुष्ठाने च प्रत्येकजन्यापूर्व्वद्वयम् उभाभ्यां विलक्षणमपूर्व्वं वा जन्यत इति गौरवं विशिष्टैककर्म्मविधाने गुणानां प्रधानस्वरूपनिर्व्वाहकाङ्क्षतया साङ्गप्रधानजन्यमेकमेवापूर्व्वं विधेयं स्यादित्यपूर्व्वैक्यादेकविधिः। अतएवोक्तं “प्राप्ते कर्म्मणि नानेकोविधातुं शक्यते गुणः। अप्राप्ते तु विधीयन्ते बहवोऽप्येकयत्नतः”। विध्यन्तरप्राप्ते प्रधाने अनेकगुणोविधातुं न शक्यते वाक्यभेदापत्तेरिति शेषः अप्राप्ते तु प्रधाने बहवोऽपि गुणा एकयत्नत एकवाक्यात् विधीयन्ते नानागुणविशिष्टैकप्रधानविधिसम्भवेनापूर्व्वैक्यादित्यर्थः। नचैकगुणविशिष्टापरगुणोविधेयः यथाग्निहोत्रमुपसदनन्तरं मासं कुर्य्यादिति न वाक्यभेद इति वाच्यम् गुणानां परस्परं विशेषणविशेष्यभावेनान्वयबोधे निराकाङ्क्षत्वात् तथाच जैमिनिसूत्रं “गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात्”। गुणानां विशेषणानां अङ्गानाञ्च परस्परमसम्बन्धः विशेष्यविशेषणभावेन नान्वयः परार्थत्वात् द्वयोरपि विशेष्यान्वयित्वात् तथासत्येव कथं नान्वयस्तत्राह समत्वात् द्वयोरेव परसाकाङ्क्षतया तुल्यरूपत्वात् न परस्परं गुणप्रधानभावः। यत्तु परस्परवैशिष्ट्येन गुणद्वयैकविधित्वे विनिगमकाभावादुभयोरपि विशेष्यत्वेन विशेषणत्वेन च विधेयत्वेन वाक्यभेद इति, तन्न विनिगमकाभावेन वाक्यस्य द्वैविध्येऽपि नापूर्व्वभेदकल्पना किन्तु कारणतावच्छेदकभेदेन कारणभेदमात्रम् अन्यथा ईदृशवाक्यभेदस्य विशिष्टैकप्रधानविधिपक्षेऽपि सम्भवात्। किमुपसदानन्तर्य्यविशिष्टे माससाध्यत्ववैशिष्ट्यं माससाध्यत्वविशिष्टे वा उपसदानन्तर्य्यवैशिष्ट्यमिति विनिगमकाभावात्। नचैकत्र द्वयमिति न्यायेन विशेष्ये युगपद्विशेषणद्वयमिति वाच्यं वेदे विशिष्टवैशिष्ट्यबोधस्यौत्सर्गिकत्वात्। किञ्च विशेष्यविशेषणभावस्य द्वैविध्येऽपि विशिष्टस्यानतिरिक्ततया कारणैक्यात् कार्य्यैक्याच्च न कार्य्यकारणभावभेदोऽपि एकाङ्गापूर्व्वं प्रत्येव परस्परसापेक्षतया उभयोर्हेतुत्वादिति वाक्यार्थैक्याच्चोक्तिभेदरूपवाक्यभेदोदोषाय कारणतावच्छेदकगौरवञ्च। विशिष्टविधिपक्षेऽपि तुल्यमित्यास्तां विस्तरः”।